क्त्वाणमुलोर्लोटश्च [1]द्विर्वचनापेक्षायामेव पौनःपुन्यप्रकाशने शक्तिः। यङ तु [2]तन्निरपेक्षः प्रकाशयति, पुनः पुनः पचति पापच्यते इति। यदा तु तत्र द्विर्वचनं तदा [3]क्रियासमभिहारे पौनःपुन्यं द्रष्टव्यम् पापच्यते पापच्यते इति। अथ केषु वीप्सा ? सुप्सु वीप्सा। का पुनर्वीप्सा ? व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा। का पुनः सा ? नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा। नानाभूतार्थवाचिनां शब्दानां [4]यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत् प्रयोक्तुमिच्छा वीप्सा। ग्रामो ग्रामो रमणीयः। जनपदो जनपदो रमणीयः। पुरुषः पुरुषो निधनमुपैति। यत् तिङन्तं नित्यतया प्रकर्षेण च युक्तं ततः कृतद्विर्वचनात् प्रकर्षप्रत्यय इष्यते पचति पचतितराम् इति। इह तु आढ्यतरमाढ्यतरमानय इति प्रकर्षयुक्तस्य वीप्सायोग इष्यते ॥

## परेर्वर्जने। (७/२१४१)

परि इत्येतस्य वर्जनेऽर्थे द्वे भवतः। परि परि त्रिगर्तेभ्यो वृष्टो देवः। परि परि सौवीरेभ्यः। परि परि [5]सर्वसेनेभ्यः। वर्जनं परिहारः। वर्जने इति किम् ? ओदनं परिषिञ्चति।

[८८२] परेर्वर्जनेऽसमासे वेति वक्तव्यम्। (म. भा. ३.३६७)

परि परि त्रिगर्तेभ्यो वृष्टो देवः, परि त्रिगर्तेभ्यः[6]। समासे तु तेनैवोक्तत्वाद् वर्जनस्य नैव भवति, परित्रिगर्तं वृष्टो देवः इति[7] ॥

## प्रसमुपोदः पादपूरणे। (६/३५९९)

प्र सम् उप उत् इत्येतेषां पादपूरणे द्वे भवतो द्विर्वचनेन चेत् पादः पूर्यते[8]। 'प्रप्रायमग्निर्भरतस्य शृण्वे' (ऋ. ७.८.४)। 'संसमिद्युवसे वृषन्' (ऋ. १०.१९१.१)। 'उपोप मे परा मृश' (ऋ. १.१२६.७)। 'किं नोदुदु हर्षसे दातवा उ' (ऋ. ४.२१.९)। पादपूरणे इति किम् ? 'प्र देवं देव्या धिया' (ऋ. १०.१७६.२)। सामर्थ्याच् छन्दस्येवैतद्विधानम्। भाषायाम[9]नर्थकं स्यात्, प्रयोगाभावात् ॥

## उपर्यध्यधसः सामीप्ये। (७/२१४२)

उपरि अधि अधस् इत्येतेषां द्वे भवतः सामीप्ये विवक्षिते। सामीप्यं प्रत्यासत्तिः कालकृता देशकृता [10]च। उपर्युपरि दुःखम्। उपर्युपरि ग्रामम्। अध्यधि ग्रामम्। अधोऽधो नगरम्। सामीप्ये इति किम् ? उपरि [11]चन्द्रमाः। इह कस्मान् न भवति, उपरि शिरसो घटं धारयति ? [12]औत्तराधर्यमेव[13] विवक्षितं न सामीप्यम् इति द्विर्वचनं न भवति ॥

---

1. द्विर्वचनापेक्षाणामेव ब. 2. निरपेक्षमेव पौनःपुन्यं प्रकाशयति ह. 3. भृशार्थे क्रियासमभिहारे पौनःपुन्ययुक्ते द्विर्वचने ह. 4. अधिकरणद्रव्यानि ड. 5. सार्वसैनिभ्यः ड. इ. क. 6. वृष्टो देवः इत्यधिकम् इ. 7. तान् परिहृत्य वृष्टो देवः इत्यर्थः इत्यधिकम् क. इ. ड. 8. पादपूरणे विधानलक्षणा सप्तमी। पादपूरणभावेन द्विर्वचनस्य भावो लक्ष्यते इत्यधिकम् इ. 9. आनर्थक्यं इ. 10. वा ड. 11. दुःखम् इ. ड. 12. केचित् इत्यधिकम् क. ड. इ. 13. केवलम् इत्यधिकम् ड. क. इ.